# 0209
# (TS)

**B**

Total No. of Questions - **16**

Total No. of Printed Pages - **4**

Regd. No. | | | | | | | | | | |

## Part - II
## SANSKRIT, Paper - II
## (Second Language)

***Time : 3 Hours*** ***Max. Marks : 100***

***Notes :***

1. ***All** questions should be attempted.*
2. *Question Nos. 1, 2 and 3 should be answered in the medium of instructions of the candidate.*
3. *The remaining questions should be answered in Sanskrit (Devnagari Script) only.*
4. *The bits of a question should be attempted together.*

**सूचना :**

1) **सर्वे** प्रश्ना: समाधेया: ।

2) प्रथम, द्वितीय, तृतीय प्रश्नान् विहाय अन्ये प्रश्ना: संस्कृतभाषायामेव (देवनागरी लिप्या) समाधेया: ।

3) अंशयुक्तस्य प्रश्नस्य अन्तर्गतांशा: एकत्रैव समाधेया: ।

**I.** **एकस्य** श्लोकस्य प्रतिपदार्थं भावं च लिखत । 1 × 8 = 8

अ) गुणस्तवेन कुर्वीत महतां मानवर्धनम् ।
हनुमानभवत् स्तुत्या रामकार्यभरक्षम: ।।

आ) अप्रमत्ताश्च सत्यैकपरा: भवत् सर्वदा ।
विजय: सत्यनिष्ठानां तथ्यं नास्त्यत्र संशय: ।।

**II.** **एकं** निबन्ध प्रश्नं समाधत्त । 1 × 6 = 6

अ) गङ्गावतरणे रतस्य भगीरथस्य प्रयत्नं संग्रहेण लिखत ।

आ) 'काव्यं पुष्पविलापनाम हृदि मे स्फूर्तम्' – विवृणुत ।

**III.** **एकं** निबन्ध प्रश्नं समाधत्त । 1 × 6 = 6

अ) चूडाला शिखिध्वजस्य मन: कथं परिवर्तितवती ?

आ) गोपाल: कृष्ण: कथं गोविन्द: अजायत ?

IV. **त्रयाणां** प्रश्नानां समाधानानि लिखत । 3 × 2 = 6

अ) आश्रमपदे रामः सीता लक्ष्मणः च कथं स्थिताः ?

आ) मित्रावसोः मुखात् नागानां कथां श्रुत्वा जीमूतवाहनः आत्मगतं किमिति अचिन्तयत् ?

इ) पितृसद्मगोचरः अपि शिवः कीदृशः ?

ई) गरुडेन कः त्वमिति पृष्टः जीमूतवाहनः किमवदत् ?

उ) आत्मनः वनगमनविषये रामः भरतं किमवदत् ?

ऊ) चिताभस्मनः रजः अपि केन विशुद्धिमश्नुते ?

V. **द्वयोः** ससन्दर्भं व्याख्यानं लिखत । 2 × 3 = 6

अ) मनोरथो महानेषः भगीरथ! महारथ!

आ) भविता ते न कदापि सत्त्वसादः ।

इ) अवदत् माङ्गलिकं गलेऽस्ति ते ।

ई) नृणां हि नीतिः क्व नु ।

VI. **द्वयोः** ससन्दर्भं व्याख्यानं लिखत । 2 × 3 = 6

अ) भवन्तमभिषेक्तुं आगतं मया ।

आ) अनाथपरिपालनं हि धर्मः अस्मद्विधानाम् ।

इ) मन्ये इदं मम परमं सौभाग्यम् ।

ई) ईदृशस्य नृपस्य राज्ये जलपानमपि अधर्मः ।

VII. **त्रयाणां** प्रश्नानां समाधानानि लिखत । 3 × 2 = 6

अ) विश्वकर्मा किमर्थं खड्गं व्यरचयत् ? कस्मै प्रादात् ?

आ) हरः गङ्गां किं प्रति विससर्ज ?

इ) कैः प्रीतिसङ्गतिं न कुर्यात् ?

ई) किं त्यागेनैव उपलभ्यते ?

उ) चन्द्रमत्याः हरिश्चन्द्रस्य स्मृतिः कस्मात् आगता ?

ऊ) विश्वसृट् कुतः पूजां न स्वीकुर्यात् ?

VIII. **त्रयाणां** प्रश्नानां समाधानानि लिखत । 3 × 2 = 6

अ) मेघानां गणस्य नाम किम् ?

आ) शूद्रकस्य राजधानी का ?

इ) विष्णोः वचनं श्रुत्वा इन्द्रः किमवदत् ?

ई) चूडाला स्वपतिदेवं किमिति अवदत् ?

उ) श्रीरामकृष्णः कम् आश्रित्य वसति स्म ?

ऊ) अन्ते वीरः राजानं किमवोचत् ?

**IX.** **एकेन वाक्येन** समाधानं दत्त । 5 × 1 = 5

अ) पुष्पविलापः संस्कृते केन अनूदितः ?

आ) सत्यविजयः इत्ययं पाठ्यभागः केन विरचितः ?

इ) शूरं केन भेदयेत् ?

ई) कतिभिः दिनैः चाणक्यः नन्दान् अपातयत् ?

उ) मधुराविजयस्य कर्त्री का ?

**X.** **एकेन वाक्येन** समाधानं दत्त । 5 × 1 = 5

अ) शुकस्य नाम् किम् ?

आ) कृष्णाय गोविन्द इति बिरुदं केन दत्तम् ?

इ) परनारीसहोदरः कः ?

ई) शिखिध्वजस्य भार्या का ?

उ) वृत्रासुरः कस्य भक्तः ?

**XI.** अधोनिर्दिष्ट कथां पठित्वा प्रश्नानां समाधानानि दत्त । 5 × 1 = 5

अस्ति कस्मिंश्चित् वने चतुरको नाम जम्बुकः । तेन कदाचिदरण्ये स्वयं मृतः गजः समासादितः । अथ तुष्टः सः तस्य समन्तात् भ्रमति स्म । परं कठिनां तस्य त्वचं दन्तैः भैत्तुम् न शशाक । अत्रान्तरे कोऽपि सिंहः तत्र आजगाम । तं दृष्ट्वा वञ्चकः चतुरकः साष्टाङ्गपातं प्रणिपत्य प्रोवाच । 'स्वामिन् भवत्पादसेवकोऽहं भवदर्थे गजं इमं रक्षामि । तदयं भक्ष्यतां स्वामिना' इति । सिंहः प्राह – 'जम्बुक! नाहमन्यहतं सत्त्वं भक्षयामि । तदेव ते मया प्रसादीकृतम् । अतः त्वमेव भक्षयं' इति । तत् श्रुत्वा जम्बुकः सानन्दमाह – 'युक्तमेव स्वामिनो मृगेन्द्रस्य' इति । अथ सिंहः गतः ।

**प्रश्ना :**

अ) जम्बुकस्य नाम किम् ?

आ) जम्बुकेन अरण्ये कः समासादितः ?

इ) तस्य त्वक् कथमस्ति ?

ई) तत्र कः आजगाम ?

उ) सिंहः जम्बुकं प्रति किमाह ?

**XII.** नामनिर्देशपूर्वकं **त्रीणि** सन्धत । **3 × 2 = 6**

अ) रामस् + शेते आ) हरिस् + टीकते

इ) सुप् + अन्तम् ई) जगत् + नाथः

उ) तपः + वनम् ऊ) वृक्षः + फलति

**XIII.** नामनिर्देशपूर्वकं **त्रीणि** विघटयत् । **3 × 2 = 6**

अ) तपःप्रभावः आ) तन्नाम

इ) वाग्वादः ई) चक्रिण्ढौकसे

उ) अरीञ्जयति ऊ) निस्सन्देहः

**XIV.** **द्वौ** शब्दौ अन्त–लिङ्ग–विभक्ति–वचन निर्देशपूर्वकं सम्पूर्णतया लिखत । **2 × 6 = 12**

अ) भिषक् आ) मनस्

इ) सम्पत् ई) यद् (नपुं)

**XV.** समासनाम निर्देशपूर्वकं **त्रयाणां** विग्रहवाक्यानि लिखत । **3 × 2 = 6**

अ) नीलघटः आ) सप्तरात्रम्

इ) रामलक्ष्मणौ ई) गोहितम्

उ) यथाशक्ति ऊ) चक्रपाणिः

**XVI.** अधोरेखाङ्कितपदं शुद्धीकृत्य शुद्धं वाक्यं लिखत । **5 × 1 = 5**

अ) उपाध्यायः पाठान् पाठयन्ति ।

आ) वानराः वृक्षमूले अतिष्ठत् ।

इ) वयं विपणिं गमिष्यामि ।

ई) तौ चित्रं पश्यन्ति ।

उ) त्वं कार्यालये तिष्ठथः ।